# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ४** (C.C.- 4.1.3. Old & New ) | गुणा: - ७० |
| विषय: - फलितज्यौतिषम् | | |
| दिनाङ्क: - १८/१२/२०१८ | **जातकपारिजात: ।** | समय: -२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितश्लोकद्वयो: कस्यचिद् एकस्य व्याख्यां कुरुत ।** **( ५ )**

*(१) कुलीरकर्काटककर्कटाख्या: कन्ठीरव: सिंहमृगेन्द्रलेया: ।*
*पाथोनकन्यारमणीतरुण्यस्तौलीवणिक्जूकतुलाघटाश्च ॥*

*(२) अन्योन्यं यदि पश्यत: शशिरवी यद्यार्किसौम्यावपि*
*वक्रोवा समगं दिनेशमसमे चन्द्रोदयौ चेत्स्थितौ ।*
*युग्मौ जर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ*
*पुंभागे सितलग्नशीतकिरणा: षट्क्लीबयोगास्त्विमे ॥*

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखत ।** **( १० )**

*(१) अथ दशबर्गीनिरूपणम्*  *(२) ग्रहाणां पीडाकरणप्रकार:*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: कस्यचित् एकस्य व्याख्यां करोतु ।** **( ५ )**

*(१) व्यवस्थितेऽर्के ससुतेविलग्नादपिक्षयेन्दौ मदनोपयाते ।*
*पितुर्वियोगं प्रवदन्ति सद्य: सुभेक्षितेतुत्रिभिरब्दमानै: ।*
*चरोपगे चन्द्रमसिक्षपायां बुधेक्षिते दूरदिशं प्रयात: ।*
*चरे शनौ भानुयुते निशायां विदेशगो याति पिता विनाशम् ॥*

*(२) मीनोदये शशिखी यदि पापयुक्तौ पापेऽष्टमे च मरणे रमणीकृतं स्यात् ।*
*भौमे सुखे दिनकरे यदि वा मदस्थे मन्देऽष्टमे शशिनि चान्नविशेषजन्यम् ॥*

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **( १० )**

*(१) अल्पायुर्योगा: ।*  *(२) लग्नायु: साधनम् ।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: कस्यचिदेकस्य उपरि व्याख्यां कुरुत ।** **( ५ )**

*(१) लग्नस्वामिनि रि:फगेतुवियति क्रूरे स चन्द्रे कुजे ।*
*जातोऽसौ परदेशग: सुखधनत्यागी दरिद्रो भवेत् ।*
*होराजन्मपती न शोभनयुतावस्तंगतावन्त्यगे ।*
*भाग्येशे यदि नष्टदारतनयो जात: कुलध्वंसक: ॥*

*(२) स्थिरलग्ने भृगौकेन्द्रे त्रिकोणेन्द्रौ शुभे तरे ।*
*मानस्थानगते सौरे योगोऽयं कुसुमो भवेत् ॥*
*दातामहीमण्डलनाथवन्द्यो भोगी महावंशजराजमुख्य:*
*लोके महाकीर्तियुत: प्रतापीनाथोनराणां कुसुमोद्भव: स्यात् ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु ।** **( १० )**

*(१) मालिकायोगः ।* *(२) दन्ताक्षिरोगमाह ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः एकस्य व्याख्यां कुरुत ।** **( ५ )**

*(१) जातः स्त्रीवशगः क्रियासु निपुणश्चन्द्रान्वितं भास्करे ।*
*तेजस्वी बलसत्त्ववाननृतवाक् पापी सभौमे रवौ ॥*
*विद्यारूपबलान्वितोऽस्थिरमतिः सौम्यान्विते पूषणि ।*
*श्रद्धाकर्मपरो नृपप्रियकरो भानौ सजीवे धनी ॥*

*(२) सेनानीर्धनवान् पिशङ्गनयनश्चोरश्च मेषां शके .*
*पीनस्कन्धमुखांशकोऽसितवपुर्जातो वृषांशेविधौ ।*
*चार्वङ्गः प्रभुसेवको लिपिकरो युग्मांशके पण्डितः ।*
*श्यामाङ्गः पितृपुत्रसौख्यरहितश्चन्द्रे कुलीरांशके ॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु ।** **( १० )**

*(१) मान्द्यब्दादिफलाध्याये राश्यंशकफलम् । (२) लाभस्थव्ययस्थग्रहफलानि ।*

**पञ्चमान्वितः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामलिघूत्तराणि लिखन्तु ।** **( १० )**

*(१) जातकपारिजातग्रन्थस्य लेखकः कः ?*

*(२) जातकपारिजातग्रन्थस्य प्रथमोध्यायस्य नाम किम् ?*

*(३) आचार्यवैद्यनाथः कस्मिन् कुलोत्पन्नः ?*

*(४) मिथुनराशेः स्थानं कुत्र भवति ?*

*(५) नौकाजन्मयोगः कथं भवति ?*

*(६) जन्मचक्रे यस्मिन् अङ्के पापग्रहाः भवन्ति तस्य फलं किम् ?*

*(७) कौ ग्रहौ ब्रणकारकौ न भवतः ?*

*(८) पापग्रहस्य राशयः के ?*

*(९) आपोक्लिमस्थानानि कानि ?*

*(१०) मदनस्य पर्यायवाची शब्दः कः ?*

*(११) सूर्यस्य निसर्गायुः का ?*

*(१२) चन्द्रस्य निसर्गायुः का ?*

*(१३) यदि जन्मकाले पापग्रहाः (रविभौमशनिक्षीणचन्द्राः) नीचगताभवेयुः तदा जातकः पापकर्मी भवति न वा ?*

*(१४) अश्विनीनक्षत्रे बालकोत्पन्नफलम् किम् ?*

*(१५) श्रवणनक्षत्रोत्पन्नजातकस्य फलं किम् ?*

--००--